## गुरु–शिष्य परम्परा स्तोत्रम् – guru-śiṣya paramparā stōtram

sadāśiva samārambhāṁ śaṅkarācārya-madhyamām |
asmadācārya paryantāṁ vandē guru paramparām || 1 ||

सदाशिव समारम्भां शङ्कराचार्य–मध्यमाम् ।
अस्मदाचार्य पर्यन्तां वन्दे गुरु परम्पराम् ॥ १ ॥

vyāsāya viṣṇu rūpāya vyāsa rūpāya viṣṇavē |
namō vai brahma-nidhayē vāsiṣṭhāya namō namaḥ || 2 ||

व्यासाय विष्णु रूपाय व्यास रूपाय विष्णवे ।
नमो वै ब्रह्मनिधये वासिष्ठाय नमो नमः ॥ २ ॥

namōऽstutē vyāsa viśālabuddhē
phullāra-vindāyata-patranētra |
yēna tvayā bhārata-taila-pūrṇaḥ
prajvālitō jñānamayaḥ pradīpaḥ || 3 ||

नमोऽस्तुते व्यास विशालबुद्धे
फुल्लारविन्दायतपत्रनेत्र ।
येन त्वया भारततैलपूर्णः
प्रज्वालितो ज्ञानमयः प्रदीपः ॥ ३ ॥

śruti smṛti purāṇānām ālayaṁ karuṇālayam |
namāmi bhagavatpāda śaṅkaraṁ lōka śaṅkaram || 4 ||

श्रुति स्मृति पुराणानाम् आलयं करुणालयम् ।
नमामि भगवत्पाद शङ्करं लोक शङ्करम् ॥ ४ ॥

śaṅkaraṁ śaṅkarācāryam kēśavaṁ bādarāyaṇam |
sūtra bhāṣya-kṛtau vandē bhagavantau punaḥ punaḥ || 5 ||

शङ्करं शङ्कराचार्यम् केशवं बादरायणम् ।
सूत्र भाष्य–कृतौ वन्दे भगवन्तौ पुनः पुनः ॥ ५ ॥

gurur-brahmā gurur-viṣṇuḥ gurur-dēvō mahēśvaraḥ |
gururēva paraṁ brahma tasmai śrī-guravē namaḥ || 6 ||

गुरुर्ब्रह्मा गुरुर्विष्णुः गुरुर्देवो महेश्वरः ।
गुरुरेव परं ब्रह्म तस्मै श्री–गुरवे नमः ॥ ६ ॥

śrī cinmaya-yatīśasya guruṁ vandē tapōvanam |
taṁ himavad-vibhūtiṁ vai jñāna-vairāgya-rūpiṇam || 7 ||

श्रीचिन्मय–यतीशस्य गुरुं वन्दे तपोवनम् ।
तं हिमवद्–विभूतिं वै ज्ञान–वैराग्य–रूपिणम् ॥ ७ ॥

samasta jana kalyāṇē nirataṁ karuṇā-mayam |
namāmi cinmayaṁ dēvaṁ sadguruṁ brahma-vidvaram || 8 ||

समस्त जन कल्याणे निरतं करुणा–मयम् ।
नमामि चिन्मयं देवं सद्गुरुं ब्रह्मविद्वरम् ॥ ८ ॥